१०/८९१८

गीताजी

गीता
गीत

पी. नागी

ॐ श्रीगणेशाय नमः ॐ अस्य श्रीभग
वद्गीतामालामन्त्रस्य श्रीभगवान्वेद
व्यासऋषिरनुष्टुप्छन्दः श्रीकृष्णः
परमात्मा देवता अशोच्यानन्वशो
चस्त्वं प्रज्ञावादांश्च भाषसे इति बीजं

सर्वधर्मान्परित्यज्यमामेकंशरणंव्रजे
तिशक्तिः अहंत्वांसर्वपापेभ्योमो
क्षयिष्यामिमाशुचेतिकीलकम् नै
नंछिन्दंतिशस्त्राणि [illegible] नैनंद
हतिपावकः इत्यंगुष्ठाभ्यांनमः न

3

चैनंक्लेदयंत्यापोनशोषयतिमारुतः इ
तितर्जनीभ्यांनमः अच्छेद्योयमदाह्योय
मक्लेद्योशोष्यएवच इतिमध्यमाभ्यांन
१ मः नित्यःसर्वगतःस्थाणुरचलोयंस
गी नातनः इत्यनामिकाभ्यांनमः पश्यमे
२

पार्थरूपाणि शतशोथ सहस्रशः इतिक
निष्ठिकाभ्यां नमः नानाविधानि दिव्या
नि नानावर्णाकृतीनि च इति करतलपृष्ठा
भ्यां नमः इति करन्यासः अथ षडङ्गन्या
सः नैनं छिन्दन्ति शस्त्राणि इति हृदयाय
।

नमः नचैनं क्लेदयन्त्यापः इति शिरसे स्वा
हा अच्छेद्योयमदाह्योयं इति शिखायै व
षट् नित्यः सर्वगतः स्थाणुः इति कवचा
य हुम् पश्य मे पार्थ रूपाणि इति नेत्राभ्यां
वौषट् नानाविधानि दिव्यानि नानावर्णा ।

क्षतीनिच इत्यस्त्रायफट् इतिषडंगन्या
सः सर्वपापनिवारणार्थे श्रीकृष्णप्रीत्य
र्थेपाठेविनियोगः ॥ अथध्यानम् पा
र्थायप्रतिबोधितांभगवतानारायणेन
स्वयंव्यासेनग्रथितांपुराणमुनिनामध्ये

महाभारते अद्वैतामृत
वर्षिणींभगवतीमष्टाद
शाध्यायिनीमम्बत्वाम
नुसंदधामिभगवद्गीते
भव

गी
५

द्वेषिणीम्॥ नमोस्तुतेव्यासवि 8
शालबुद्धेफुल्लारविंदायतपत्र
नेत्र॥ येनत्वयाभारततैलपूर्णः
प्रज्वालितोज्ञानमयःप्रदीपः॥प्र
पन्नपारिजातायतोत्रवेत्रैकपाणये

१

गी॰ प्र॰ ५

ज्ञानमुद्रायकृष्णायगीतामृतदु।
हेनमः॥सर्वोपनिषदोगावोदोग्धा
गोपालनंदनः॥पार्थोवत्सःसु।
धीर्भोक्तादुग्धंगीतामृतंमहत्॥
वसुदेवसुतंदेवंकंसचाणूरमर्द

नमः॥ देवकीपरमानंदं कृष्णं वंदे ज
गद्गुरुम्॥ भीष्मद्रोणतटा जयद्र
थजला गान्धारनीलोत्पला। श
ल्यग्राहवती कृपेण वहिनी कर्णे
नवेलाकुला॥ अश्वत्थामविकर्ण

॥

गी॰ घोरमकराउर्योधनावर्त्तिनी सो
वृ॰ त्तीर्णा खलु पांडवै रणनदी कैव
र्त्तके केशवे पाराशर्यवचः सरो
जममलं गीतार्थगंधोत्कटं ना
नाख्यानककेसरं हरिकथासंबो

यन्नाबोधिते लोकेसज्जनषट्प 12
दैर्हरहः पेपीयमानंमुदाभूय
ज्ञारतपंकजंकलिमलप्रध्वंसि
नःश्रेयसे मूकंकरोतिवाचालं
पंगुंलंघयतेगिरिं यत्कृपातम

13

गी. पु. ७

हंवंदेपरमानंदमाधवम् यंब्र
ह्मावरुणेंद्ररुद्रमरुतःस्तुन्वं
तिदिव्यैःस्तवैर्वेदैःसांगपदक्र
मोपनिषदैर्गायंतियंसामगाः
ध्यानावस्थिततद्गतेनमनसा

पश्यन्तियोगिनोयस्यांतेनवि 14
दुःस्वरास्वराणांदेवायतस्मैन
मः॥धृतराष्ट्रउवाच॥धर्मक्षे
त्रेकुरुक्षेत्रेसमवेतायुयुत्सवः
मामकाःपाण्डवाश्चैवकिमकुर्व

15

गी. तसंजय॥१॥संजयउवाच॥दृष्ट्वा
पु. तुपाण्डवानीकंव्यूढंदुर्योध
८ नस्तदा आचार्यमुपसंगम्यरा
जावचनमब्रवीत् २ पश्यैतां
पांडुपुत्राणामाचार्यमहतीं च॰

मूम् व्यूढांद्रुपदपुत्रेणतवशि 16
ष्येणधीमता ३ अत्रशूरामः
हेष्वासाभीमार्ज्जुनसमायुधि
युयुधानोविराटश्चद्रुपदश्चम
हारथः ४ धृष्टकेतुश्चेकितान

17

गी. काशिराजश्च वीर्यवान् पुरुजि
अ. त्कुन्तिभोजश्च शैब्यश्च नरपुङ्ग
१ वः ५ युधामन्युश्च विक्रान्त उ
त्तमौजाश्च वीर्यवान् सौभद्रो
द्रौपदेयाश्च सर्व एव महारथा

६ अस्माकंतुविशिष्टायेतान्निबो
धद्विजोत्तम नायकाममसैन्य
स्यसंज्ञार्थंतान्ब्रवीमिते ७ भवा
न्भीष्मश्चकर्णश्चकृपश्चसमितिंज
यः अश्वत्थामाविकर्णश्चसौमद

19

गी. त्तिस्तथैव च ८ अन्ये च बहवः
प्र. शूरा मदर्थे त्यक्तजीविताः नाना
१ शस्त्रप्रहरणाः सर्वे युद्धविशारदाः
९ अपर्याप्तं तदस्माकं बलं भीष्मा
भिरक्षितं पर्याप्तं त्विदमेतेषां बलं भी

माभिरक्षितम् ॥ अयनेषु च सर्वेषु
यथाभागमवस्थिताः ॥ भीष्ममे
वाभिरक्षन्तु भवन्तः सर्व एव हि
११ ॥ तस्य संजनयन्हर्षं कुरुवृद्धः
पितामहः ॥ सिंहनादं विनद्योच्चैः

२१

गी. शं खेदध्मो प्रतापवान् ॥ ८ ॥ ततः
प्र. शंखाश्च भे[illegible]र्यश्च पणवानकगो
११ मुखाः ॥ सहसैवाभ्यहन्यंत स श
ब्दस्तुमुलोभवत् ॥ १३ ॥ ततः श्वेतै
र्हयैर्युक्ते महति स्यंदने स्थितौ ।

माधवः पाण्डवश्चैव दिव्यौ शंखौ
प्रदध्मतुः ॥१४॥ पांचजन्यं हृषी
केशो देवदत्तं धनंजयः ॥ पौण्ड्रं द
ध्मौ महाशंखं भीमकर्मा वृकोदरः
१५॥ अनंतविजयं राजा कुंतीपुत्रो

23

गी. प्र. १२

युधिष्ठिरः ॥ नकुलः सहदेवश्च सु
घोषमणिपुष्पकौ ॥ १६ ॥ काश्य
श्च परमेष्वासः शिखण्डी च महा
रथः ॥ धृष्टद्युम्नो विराटश्च सात्यकि
श्चापराजितः ॥ १७ ॥ द्रुपदो द्रौपदेया

स्त्वं सर्वज्ञः पृथिवीपते ॥ सो भद्रस्त्व

महाप्राज्ञः कालोद धर्मं पृथक्कृत्य वी

कृ ॥ २८ ॥ स चोक्तो यथार्थं तं ब्राह्मणोह ं

दया निर्विदर यत ॥ नमस्व पृथिवी व्य

दैवतम्मुलोक्यानुनादयन ॥ २९ ॥ स्त्र

गी. थव्यवस्थितान्दृष्ट्वा धार्तराष्ट्रान्क
प. पिध्वजः॥ प्रवृत्ते शस्त्रसम्पाते ध
२ नुरुद्यम्य पाण्डवः॥२०॥ हृषीके
शं तदा वाक्यमिदमाह महीप
ते॥ अर्जुन उवाच॥ सेनयोरुभयो

मध्येरथंस्थापयमेच्युत॥ यावदे
तान्निरीक्षेहंयोद्धुकामानवस्थि
तान्॥ कैर्मयासहयोद्धव्यमस्मि
न्रणसमुद्यमे॥ २२॥ योत्स्यमानान
वेक्षेहंयएतेत्रसमागताः॥ धार्त

27

गी.
प्र.
१८

राष्ट्रस्य दुर्बुद्धेर्युद्धे प्रियचिकी
र्षव ॥ २३ ॥ संजय उवाच ॥ एवमुक्तो
हृषीकेशो गुडाकेशेन भारत ॥ से
नयोरुभयोर्मध्ये स्थापयित्वा रथो
त्तमम् ॥ २४ ॥ भीष्मद्रोणप्रमुखतः

सर्वेषांचमहीक्षितामू ॥ उवाच
पार्थपश्येतान्समवेतान्कुरूनिति
२५ ॥ तत्रापश्यत्स्थितान्पार्थः पि
तॄनथपितामहान् ॥ आचार्यान्मा
तुलान्भ्रातॄन्पुत्रान्पौत्रान्सखींस्त

गी. या ॥ २६ ॥ श्वशुरान्सुहृदश्चैव सेन
प्र. योरुभयोरपि ॥ तान्समीक्ष्य स कौ
१५ न्तेयः सर्वान्बन्धूनवस्थितान् ॥ २७ ॥
कृपया परयाविष्टो विषीदन्निद
मब्रवीत् ॥ अर्जुन उवाच ॥ दृष्ट्वेमं

स्वजनंकृष्णयुयुत्सुंसमुपस्थि
तम्॥सीदंतिममगात्राणिमुखं
चपरिशुष्यति॥वेपथुश्चशरीमे २८
रोमहर्षश्चजायते॥२९॥गाण्डी
वंस्रंसतेहस्तात्त्वक्चैवपरिदह्यते
स्त

31

गी. न च शक्नोम्यवस्थातुं भ्रमतीव
प्र. च मे मनः ॥ ३० ॥ निमित्तानि च प
१ श्यामि विपरीतानि केशव ॥ न च
श्रेयोनुपश्यामि हत्वा स्वजन
माहवे ॥ ३१ ॥ न कांक्षे विजयं कृष्ण

नच राज्यं सुखानि च॥ किं नो राज्ये 32
न गोविंद किं भोगैर्जीवितेन वा॥ ११
येषामर्थे कांक्षितं नो राज्यं भोगाः
सुखानि च॥ त इमेवस्थिता युद्धे
प्राणांस्त्यक्त्वा धनानि च॥३३॥

गी॰ आचार्याः पितरः पुत्रास्तथैव च
प्र॰ पितामहाः ॥ मातुलाः श्वशुराः
९ पौत्राः स्यालाः संबन्धिनस्तथा
३४ ॥ एतान्न हन्तुमिच्छामि घ्नतो
ऽपि मधुसूदन ॥ अपि त्रैलोक्यरा

ज्यस्य हेतोः किंनु महीकृते ॥३५॥
निहत्य धार्त्तराष्ट्रान्नः का प्रीतिः
स्याज्जनार्दन ॥ पापमेवाश्रयेद
स्मान्हत्वैतानाततायिनः ॥३६॥ त
स्मान्नार्हा वयं हन्तुं धार्त्तराष्ट्रान्स्वबा

35

गी॰ प्र॰ ८

धवान्॥ स्वजनं हि कथं हत्वा सु
खिनः स्याम माधव॥ ३७॥ यद्यप्ये
ते न पश्यन्ति लोभोपहतचेतस
ः कुलक्षयकृतं दोषं मित्रद्रोहे च
पातकम्॥ ३८॥ कथं न ज्ञेयमस्मा

भिः पापादस्मान्निवर्तितुम् ॥ कु
लक्षयकृतं दोषं प्रपश्यद्भिर्ज
नार्दन ॥ ३९ ॥ कुलक्षये प्रणश्यं
ति कुलधर्माः सनातनाः ॥ धर्मे नष्टे
कुलं कृत्स्नमधर्मोऽभिभवत्युत ॥

37

गी. पु. [illegible]

॥ ४० ॥ अधर्माभिभवात्कृष्णप्रदु
ष्यंतिकुलस्त्रियः ॥ स्त्रीषुदुष्टा
सुवार्ष्णेयजायतेवर्णसंकर:
॥ ४१ ॥ संकरोनरकायैवकुलघ्ना
नांकुलस्यच ॥ पतंतिपितरोह्ये

षां लुप्तपिण्डोदकक्रियाः॥ ॥ 38
दोषैरेतैः कुलघ्नानां वर्णसंकर
कारकैः॥ उत्साद्यन्ते जातिधर्माः
कुलधर्माश्च शाश्वताः॥४२॥ उ
त्सन्नकुलधर्माणां मनुष्याणां जना

न

४१

गी. र्दन नरके नियतं वासो भवतीत्यनुशु
प्र. श्रुम ॥४४॥ अहो बत महत्पापं कर्तुं व्य
२. वसिता वयम् ॥ यद्राज्यसुखलोभेन हन्तुं
स्वजनमुद्यताः ॥४५ यदि मामप्रती
कारमशस्त्रं शस्त्रपाणयः ॥ धार्तराष्ट्रा

णेहन्युस्तन्मेक्षेमतरंभवेत्॥४६॥संज 40
यउवाच॥एवमुक्त्वार्जुनःसंख्येरथो
पस्थउपाविशत्॥विसृज्यसशरंचा
पंशोकसंविग्नमानसः॥इतिश्रीभग
वद्गीतासूपनिषत्सुब्रह्मविद्यायांयो

४

गी. गशास्त्रे श्रीकृष्णार्जुनसंवादेर्जुन
द्वि. विषादो नाम प्रथमोध्यायः ॥१॥ सं
जय उवाच ॥ तं तथा कृपयाविष्टमश्रु
पूर्णाकुलेक्षणम् ॥ विषीदंतमिदं वा
क्यमुवाच मधुसूदनः ॥ श्रीभग

वानुवाच॥ कुतस्त्वाकश्मलमिदंवि
षमेसमुपस्थितम॥अनार्यजुष्टम
स्वर्ग्यमकीर्तिकरमर्जुन॥२॥क्लैब्यं
मास्मगमःपार्थनैतत्त्वय्युपपद्यते
क्षुद्रंहृदयदौर्बल्यंत्यक्त्वोत्तिष्ठप

गी. ंतप॥३॥ अर्जुन उवाच॥ कथंभीष्मम
२ हंसंख्ये द्रोणंचमधुसूदन॥ इषुभिः
प्रतियोत्स्यामि पूजार्हावरिसूदन
४॥ गुरूनहत्वाहि महानुभावान्श्रेयो
भोक्तुंभैक्ष्यमपीहलोके॥ हत्वार्थ

कामांस्तुगुरूनिहैवभुंजीयभोगान्रु
धिरप्रदिग्धान्॥५॥नचैतद्विद्मःक
तरन्नोगरीयोयद्वाजयेमयदिवानो
जयेयुःयानेवहत्वानजिजीविषाम
स्तेवस्थिताःप्रमुखेधार्तराष्ट्राः॥६॥

गी. कार्पण्यदोषोपहतस्वभावः पृच्छा
द्वि. मित्वांधर्मसंमूढचेताः यच्छ्रेयःस्या
न्निश्चितंब्रूहितन्मेशिष्यस्तेहंशाधि
मांत्वांप्रपन्नम्॥७॥नहिप्रपश्यामि
ममापनुद्याद्यच्छोकमुच्छोषणमि

न्द्रियाणाम् अवाप्य भूमावसपत्नमृद्धं
राज्यंसुराणामपिचाधिपत्यम् ८ सं
जयउवाच ॥ एवमुक्त्वाहृषीकेशंगुडा
केशः परंतप ॥ नयोत्स्यइतिगोविं
दमुक्त्वातूष्णींबभूवह ॥९॥ तमुवा

47

गी. तहृषीकेशः प्रहसन्निव भारत से
द्वि. नयोरुभयोर्मध्ये विषीदन्तमिदं व
२४ वः ॥१०॥ श्रीभगवानुवाच ॥ अशोच्या
नन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे
गतासूनगतासूंश्च नानुशोचं

निपातिता:॥११॥नत्वेवाहंजातु
नासंनत्वंनेमेजनाधिपा:॥नचैव
नभविष्याम:सर्वेवयमत:परम् १२
देहिनोस्मिन्यथादेहेकौमारंयौव
नंजरा॥तथादेहांतरप्राप्तिर्धीरस्तत्र

गी. नमुह्यति॥१३॥मात्रास्पर्शास्तु
द्वि. कौंतेयशीतोष्णसुखदुःखदाः॥
२५ आगमापायिनोनित्यास्तांस्ति
तिक्षस्वभारत॥१४॥यंहिनव्यथ
यंत्येतेपुरुषंपुरुषर्षभ॥समदुः

खसुखंधीरंसोमृतत्वायकल्पते
॥२५॥नासतोविद्यतेभावोनाभावोवि
द्यतेसतः॥उभयोरपिदृष्टोन्तस्त्वन
योस्तत्त्वदर्शिभिः॥२६॥अविनाशि
तुतद्विद्धियेनसर्वमिदंततम्॥वि

51

य

गी॰ नाशमव्यस्यास्यनकश्चित्कर्तुमर्ह
द्वि॰ ति॥१७॥ अंतवंत इमे देहा नित्यस्योक्ता
[illegible] शरीरिणः॥ अनाशिनोऽप्रमेयस्य तस्मा
द्युध्यस्व भारत॥१८॥ य एनं वेत्ति ह
न्तारं यश्चैनं मन्यते हतं॥ उभौ तौ न

विजानीतोनायंहंतिनहन्यते॥१९॥
नजायतेम्रियतेवाकदाचिन्नायं
भूत्वाभविता वानभूयः॥अजोनि
त्यःशाश्वतोयंपुराणोनहन्यतेह
न्यमानेशरीरे॥२०॥वेदाविनाशिनं

53

गी. नित्यं यएनमजमव्ययं॥ कथं सपुरुषः
द्वि. पार्थ कंघातयति हंति कं॥ २१॥ वा
२ सांसि जीर्णानि यथा विहाय नवा
नि गृह्णाति नरो पराणि॥ तथा शरीरा
णि विहाय जीर्णान्यन्यानि संयाति

नवानिदेही २२॥ नैनंछिंदंतिशस्त्राणि
नैनंदहतिपावकः॥ नचैनंक्लेदयंत्या
पोनशोषयतिमारुतः॥ २३॥ अछेद्यो
यमदाह्योयमक्लेद्योशोष्यएवच॥ नि
त्यःसर्वगतःस्थाणुरचलोयंसना

गी. नन ॥ २४ ॥ अव्यक्तोयमचिंत्योयमवि
द्वि. कार्योयमुच्यते ॥ तस्मादेवंविदित्वैनं
नानुशोचितुमर्हसि ॥ २५ ॥ अथचैनं
नित्यजातं नित्यंवामन्यसेमृतम् ॥
तथापित्वंमहाबाहोनैवंशोचितुम।

र्हसि ॥ २६ ॥ जातस्यहिध्रुवोमृत्युर्ध्रुवं
जन्ममृतस्यच ॥ तस्मादपरिहार्येर्थे
नत्वंशोचितुमर्हसि ॥ २७ ॥ अव्यक्ता
दीनिभूतानिव्यक्तमध्यानिभारत ॥ अ
व्यक्तनिधनान्येवतत्रकापरिदेवना

57

गी. ॥२८॥ आश्चर्यवत्पश्यति कश्चिदेनमा
द्वि. श्चर्यवद्वदति तथैनमन्यः ॥ आश्चर्यवा
च्चैनमन्यः शृणोति श्रुत्वाप्येनं वेद न
चैव कश्चित् ॥२९॥ देही नित्यमवध्यो
यं देहे सर्वस्य भारत ॥ तस्मात्सर्वाणि ।

सर्वधर्ममपिचावेक्ष्यनविकम्पितुमर्हसि

58

भूतानिनत्वंशोचितुमर्हसि॥ धर्म्या
द्धियुद्धाच्छ्रेयोन्यत्क्षत्रियस्यनविद्य
ते॥

॥३१॥ यदृच्छयाचोपपन्नंस्वर्ग
द्वारमपावृतम् सुखिनःक्षत्रियाःपा

59

गी. र्थलभंतेयुद्धमीदृशम्॥३२॥अथचे

द्वि. त्त्वमिमंधर्म्यंसंग्रामंनकरिष्यसि।त

तःस्वधर्मंकीर्तिंचहित्वापापमवा

प्स्यसि॥३३॥अकीर्तिंचापिभूतानि

कथयिष्यंतितेव्ययाम्॥संभावि

तस्य चाकीर्तिमरणाद् अतिरिच्यते॥ ३४
भयाद्रणादुपरतं मंस्यन्ते त्वां महारथाः
येषां च त्वं बहुमतो भूत्वा यास्यसि ला
घवम्॥ ३५॥ अवाच्यवादांश्च बहून्वदि
ष्यन्ति तवाहिताः॥ निंदंतस्तव सामर्थ्यं

61

गी. ततोदुःखतरंनुकिम्॥३६॥हतोवाप्रा
प्स्यसिस्वर्गंजित्वावाभोक्ष्यसेमही
२२ म्॥तस्मादुत्तिष्ठकौन्तेययुद्धायकृत
निश्चयः॥३७॥सुखदुःखेसमेकृत्वा
लाभालाभौजयाजयौ॥ततोयुद्धाय

युज्यस्वनैवंपापमवाप्स्यसि॥३८॥एष
ातेभिहितासांख्येबुद्धिर्योगेत्विमां
शृणु॥बुद्ध्यायुक्तोययापार्थकर्मबं
धंप्रहास्यसि॥३९॥नेहाभिक्रम
नाशोस्तिप्रत्यवायोनविद्यते॥स्वल्प

गी. मप्यस्यधर्मस्यत्रायते महतोभयात्
द्वि. ४०॥व्यवसायात्मिकाबुद्धिरेकेहकुरु
अ. नंदन॥बहुशाखाह्यनंताश्चबुद्धयो
व्यवसायिनाम्॥४१॥यामिमांपुष्पितां
वाचंप्रवदंत्यविपश्चितः॥वेदवादर।

तां पार्थ नान्यदस्तीति वादिनः ॥४२॥ का
मात्मानः स्वर्गपरा जन्मकर्मफलप्र
दाम् ॥ क्रियाविशेषबहुलां भोगैश्व
र्यगतिं प्रति ॥ ४३ ॥ भोगैश्वर्यप्रसक्ता
नां तयापहृतचेतसां ॥ व्यवसायात्मिका

गी. बुद्धिः समाधौ न विधीयते ॥४४॥ त्रैगु
द्वि. ण्यविषया वेदा निस्त्रैगुण्यो भवार्जु
३३ न ॥ निर्द्वंद्वो नित्यसत्त्वस्थो निर्योग
क्षेम आत्मवान् ॥४५॥ [redacted] ॥ यावानर्थ

तावान्सर्वेषुवेदेषु
ब्राह्मणस्यविजानतः

उदपानेसर्वतःसंप्लुतोदके॥४६॥क ६६
र्मण्येवाधिकारस्तेमाफलेषुकदाच
न॥माकर्मफलहेतुर्भूर्मातेसंगोस्त्वक
र्मणि॥४७॥योगस्थःकुरुकर्माणिसंगं
त्यक्त्वाधनंजय॥सिद्ध्यसिद्ध्योःसमो

गी. भूत्वासमत्वंयोगउच्यते ॥ ४८ ॥ दूरेणह्य
द्वि. वरंकर्मबुद्धियोगाद्धनंजय ॥ बुद्धौशर
७४ णमन्विच्छकृपणाःफलहेतवः ॥ ४९
बुद्धियुक्तोजहातीहउभेसुकृतदुष्कृ
ते ॥ तस्माद्योगाययुज्यस्वयोगःकर्मसु

कौशलम् ॥५०॥ कर्मजं बुद्धियुक्ता हि फ
लं त्यक्त्वा मनीषिणः ॥ जन्मबन्धविनिर्मु
क्ताः पदं गच्छंत्यनामयम् ॥५१॥ यदा ते
मोहकलिलं बुद्धिर्व्यतितरिष्यति ॥ ता
दा गन्तासि निर्वेदं श्रोतव्यस्य श्रुतस्य च

69

गी ५२॥श्रुतिविप्रतिपन्नातेयदास्थास्यति
हि॰ निश्चला॥समाधावचलाबुद्धिस्तदा
२५ योगमवाप्स्यसि॥५३॥अर्जुनउवाच॥स्थि
तप्रज्ञस्यकाभाषासमाधिस्थस्यकेश
वस्थितधीःकिंप्रभाषेतकिमासीतव्र

जेत किम ॥५४॥ श्रीभगवानुवाच ॥ प्रज
हाति यदा कामान्सर्वान्पार्थ मनोगता
न् ॥ आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदो
च्यते ॥५५॥ दुःखेष्वनुद्विग्नमनाः सुखे
षु विगतस्पृहः ॥ वीतरागभयक्रोधः

गी. स्थितधीर्मुनिरुच्यते यः सर्वत्रानभिस्ने
द्वि. ह स्तत्तत्प्राप्य शुभाशुभम्॥ नाभिनंद
२६ ति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता॥ ५७॥
यदा संहरते चायं कूर्मोऽङ्गानीव सर्व
शः॥ इंद्रियाणींद्रियार्थेभ्यस्तस्य प्रज्ञा

प्रतिष्ठिता ॥५८॥ विषया विनिवर्त्तंते नि
राहारस्य देहिनः रसवर्ज्जं रसोप्यस्य प
रं दृष्ट्वा निवर्त्तते ॥५९॥ यततो ह्यपि कौं
तेय पुरुषस्य विपश्चितः ॥ इंद्रियाणि
प्रमाथीनि हरंति प्रसभं मनः ॥६०॥ ता

73

गी. निसर्वाणिसंयम्ययुक्तआसीतमत्प
द्वि. रः॥वशेहियस्येंद्रियाणितस्यप्रज्ञा
३२ प्रतिष्ठिता॥६१॥ध्यायतोविषयान्पुं
सः संगस्तेषूपजायते॥संगात्संजाय
मि तेकामःकामात्क्रोधोभिजायते॥६२॥क्रो

धाद्भवतिसंमोहः संमोहात्स्मृतिविभ्र
मः स्मृतिभ्रंशाद्बुद्धिनाशोबुद्धिना
शात्प्रणश्यति ॥६३॥ रागद्वेषवियुक्तै
स्तुविषयानिंद्रियैश्चरन् ॥ आत्मवश्यै
र्विधेयात्माप्रसादमधिगच्छति ॥६४॥

गी. प्रमादे सर्वदुःखानां हानिरस्योपजायते॥ प्रसन्नचेतसो ह्याशु बुद्धिः पर्यव
द्वि. तिष्ठते॥ ६५॥ नास्ति बुद्धिरयुक्तस्य न
च चायुक्तस्य भावना॥ न चाभावयतः शां
तिरशान्तस्य कुतः सुखम्॥ ६६॥ इंद्रिया-
णां हि चरतां

...यत्नात्कुर्वीत ... तमिवां
...भिः। तस्माद्यस्य महाबाहो निगृहीतानि सर्वशः इन्द्रिया

णीन्द्रियार्थेभ्यस्तस्यप्रज्ञाप्रतिष्ठिता 76
६८॥यानिशासर्वभूतानांतस्यांजाग
र्तिसंयमी॥यस्यांजाग्रतिभूतानिसा
निशापश्यतोमुने॥६९॥आपूर्यमाण
मचलप्रतिष्ठंसमुद्रमापःप्रविशन्ति

गी. यद्वत् ॥ तद्वत्कामा यं प्रविशंति सर्वे स

द्वि. शांतिमाप्नोति न कामकामी ॥७०॥

११ विहाय कामान्यः सर्वान्पुमांश्चरति

निःस्पृहः ॥ निर्ममो निरहंकारः स

शांतिमधिगच्छति ॥७१॥ एषा ब्राह्मी स्थि

स्थितिःपार्थनैनांप्राप्यविमुह्यति॥स्थि
त्वास्यामंतकालेपिब्रह्मनिर्वाणमृ
च्छति ७२॥इतिश्रीभगवद्गीतासूपनि
षत्सुब्रह्मविद्यायांयोगशास्त्रेश्रीकृ
ष्णार्जुनसंवादेसांख्ययोगोनामद्विती

79

गी. योध्यायः॥२॥अर्जुनुवाच॥ज्यायसी
तृ. चेत्कर्मणस्तेमताबुद्धिर्जनार्दन॥तत्किं
३. कर्मणिघोरेमांनियोजयसिकेशव॥
व्यामिश्रेणेववाक्येनबुद्धिंमोहयसी
वमे॥तदेकंवदनिश्चित्ययेनश्रेयोह

माप्नुयां॥२॥ श्रीभगवानुवाच॥ लोके
स्मिन्द्विविधा निष्ठा पुरा प्रोक्ता मयान
घ॥ ज्ञानयोगेन सांख्यानां कर्मयोगेन
योगिनां॥ न कर्मणामनारम्भान्नैष्कर्म्यं
पुरुषोऽश्नुते॥ नच संन्यसनादेव सिद्धिं

८१

गी. समधिगच्छति॥४॥ नहिकश्चित्क्षणमपि
८ जातुतिष्ठत्यकर्मकृत॥ कार्यतेह्यवशः
४ कर्म सर्वःप्रकृतिजैर्गुणैः॥५॥कर्मे
न्द्रियाणिसंयम्ययआस्तेमनसास्मर
न्॥इंद्रियार्थान्विमूढात्मामिथ्याचारः

सउच्यते॥६॥यस्त्विंद्रियाणिमनसानि
यम्यारभतेर्ज्जुन॥कर्मेंद्रियैःकर्मयोग
मसक्तःसविशिष्यते॥७॥नियतंकुरु
कर्मत्वंकर्मज्यायोह्यकर्मणः॥शरीरया
त्रापिचतेनप्रसिद्धेदकर्मणः॥८॥यज्ञा

43

गी- र्थात्कर्मणोन्यत्रलोकोयंकर्मबंधनः
ते: तदर्थंकर्मकौंतेयमुक्तसंगःसमाच
४२ र॥९॥सहयज्ञाःप्रजाःसृष्ट्वापुरोवाचप्र
जापतिः॥अनेनप्रसविष्यध्वमेषवो
स्त्विष्टकामधुक्॥१०॥देवान्भावयता

नेनतेदेवाभावयंतुवः॥ परस्परंभावयं
तः श्रेयःपरमवाप्स्यथ॥११॥ इष्टान्भो
गान्हिवोदेवादास्यंतेयज्ञभाविताः॥
तैर्दत्तानप्रदायैभ्योयोभुंक्तेस्तेनएवसः
यज्ञशिष्टाशिनःसंतोमुच्यंतेसर्वकि

85

गी. ल्बिषैः॥ भुंजते ते त्वघं पापा ये पचंत्या
टी. त्मकारणात्॥ १३॥ अन्नाद्भवंति भूता
४२ नि पर्जन्यादन्नसंभवः॥ यज्ञाद्भवति पर्ज
न्यो यज्ञः कर्मसमुद्भवः॥ १४॥ कर्म ब्रह्मो
द्भवं विद्धि ब्रह्माक्षरसमुद्भवम्॥ तस्मा

त्सर्वगतंब्रह्मनित्यंयज्ञेप्रतिष्ठितम् ॥१५
एवंप्रवर्तितंचक्रंनानुवर्तयतीहयः ॥ अ
घायुरिंद्रियारामोमोघंपार्थसजीवति
॥१६॥ यस्त्वात्मरतिरेवस्यादात्मतृप्तश्च।
मानवः ॥ आत्मन्येवचसंतुष्टस्तस्यकार्यंन

87

गी. विद्यते ॥१७॥ नैवतस्यकृतेनार्थोनाकृते
त. नेहकश्चन ॥ नचास्यसर्वभूतेषुकश्चिद
४८ र्थव्यपाश्रयः ॥१८॥ तस्मादसक्तः सततं
कार्यंकर्मसमाचर ॥ असक्तोह्याचरन्कर्म
परमाप्नोतिपूरुषः ॥१९॥ कर्मणैवहिसंसि

द्धिमास्थिताजनकादय॥लोकसंग्रह
मेवापिसंपश्यंकर्तुमर्हसि॥२०॥यद्य
दाचरतिश्रेष्ठस्तत्तदेवेतरोजनः॥सय-
त्प्रमाणंकुरुतेलोकस्तदनुवर्तते॥२१॥
नमेपार्थास्तिकर्तव्यंत्रिषुलोकेषुकिंचन

४९

गी॰ नानवाप्तमवाप्तव्यंवर्त्तएवचकर्मणि॥२२॥ २

टी॰ यदिह्यहंनवर्तेयंजात्वकर्मण्यतंद्रितः

४५ ममवर्त्मानुवर्ततेमनुष्याःपार्थसर्वशः

॥२३॥उत्सीदेयुरिमेलोकानकुर्यांकर्मचेद

हं॥संकरस्यचकर्तास्यामुपहन्यामि

मा प्रज्ञा ॥ सक्ताःकर्मण्यविद्वांसोयथा
कुर्वंतिभारत ॥ कुर्याद्विद्वांस्तथासक्तश्चि
कीर्षुर्लोकसंग्रहम् ॥ २५ ॥ नबुद्धिभेदंज
नयेदज्ञानांकर्मसंगिनाम् ॥ जोषयेत्स
र्वकर्माणिविद्वान्युक्तःसमाचरन् ॥ २६

प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः अहंकारविमू

ढात्मा कर्ताहमिति मन्यते

९१

गी- तत्ववित्तुमहाबाहो गुणकर्मविभाग
ट योः॥ गुणागुणेषुवर्तंतेइतिमत्वानस
३६ ज्जते॥२८॥प्रकृतेर्गुणसंमूढाःसज्ज
तेगुणकर्मसु॥ तानकृत्स्नविदोमंदा
न्कृत्स्नविन्नविचालयेत्॥२९॥मयि

सर्वाणिकर्माणिसंन्यस्याध्यात्मचेतसा
निराशीर्निर्ममोभूत्वायुध्यस्वविगत
ज्वरः॥३०॥येमेमतमिदंनित्यमनुतिष्ठ
न्तिमानवाः॥श्रद्धावन्तोनसूयन्तोमुच्यन्ते
तेपिकर्मभिः॥३१॥येत्वेतदभ्यसूयन्तो

93

गी. नानुतिष्ठंतिमेमतम्॥ सर्वज्ञानविमूढां

३. स्तान्विद्धिनष्टानचेतसः॥३२॥सदृशंचे

४३ ष्टतेस्वस्याःप्रकृतेर्ज्ञानवानपिप्रकृतिं

यांतिभूतानिनिग्रहःकिंकरिष्यति॥३३॥

इंद्रियस्येंद्रियस्यार्थेरागद्वेषौव्यवस्थि

तौ तयोर्नवशमागच्छेत्तौ ह्यस्य परिपं
थिनौ ॥३४॥ श्रेयान्स्वधर्मो विगुणः परध
र्मात्स्वनुष्ठितात् ॥ स्वधर्मे निधनं श्रेयः
परधर्मो भयावहः ॥ अर्जुन उवाच
अथ केन प्रयुक्तोऽयं पापं चरति पूरुषः

95

गी. तृ. ९८

अनिच्छन्नपिवार्ष्णेयबलादिवनियोजि
तः॥३६॥श्रीभगवानुवाच॥कामएषक्रो
धएषरजोगुणसमुद्भवः॥महाशनोम
हापाप्माविद्ध्येनमिहवैरिणम्॥३७॥धू
मेनाव्रियतेवह्निर्यथादर्शोमलेनच॥य



योल्बेनावृतोगर्भस्तयातेनेदमावृतम्॥३
८आवृतंज्ञानमेतेनज्ञानिनोनित्यवैरिणा
कामरूपेणकौन्तेयदुष्पूरेणानलेनच
॥३९॥इन्द्रियाणिमनोबुद्धिरस्याधिष्ठान
मुच्यते॥एतैर्विमोहयत्येषज्ञानमावृत्य

गी. देहिनम्॥४०॥तस्मात्वमिंद्रियाण्यादौनि
त. यम्यभरतर्षभ॥पाप्मानंप्रजहिह्येनंज्ञान
४१ विज्ञाननाशनम्॥४१॥इंद्रियाणिपराण्या
हुरिंद्रियेभ्यःपरंमनः॥मनसस्तुपराबु
द्धिर्योबुद्धेःपरतस्तुसः॥४२॥एवंबुद्धेःप

98

बुद्ध्वा संस्तभ्यात्मानमात्मना ॥ जहि

शत्रुं महाबाहो कामरूपं दुरासदम् ॥ ४३॥ ३

इति श्रीभगवद्गीसूपनिषत्सु ब्रह्मवि-

द्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे

कर्मयोगो नाम तृतीयोऽध्यायः ॥३॥ [illegible] ॥

११
गी
ते·
५

श्रीभगवानुवाच ॥ इमंविवस्वतेयोगंप्रोक्तवा
नहमव्ययं ॥ विवस्वान्मनवेप्राहमनुरि
क्ष्वाकवेऽब्रवीत् ॥१॥ एवंपरंपराप्राप्तमिमं
राजर्षयोविदुः ॥ सकालेनेहमहता
योगोनष्टःपरंतप ॥२॥ सएवायंमयाते

ह्ययोगः प्रोक्तः पुरातनः॥ भक्तोसिमेस
खाचेतिरहस्यंह्येतदुत्तमं॥३॥ अर्जुनउ
वा॥ अपरंभवतोजन्मपरंजन्मविवस्वतः
कथमेतद्विजानीयांत्वमादौप्रोक्तवानि
ति॥४॥ श्रीभगवानुवाच॥ बहूनिमेव्यती

गी॰ तानिजन्मानितवचार्जुन ॥ तान्यहंवेदस
च॰ र्वाणिनत्वंवेत्थपरंतप ॥ ५ ॥ अजोपिसन्नव्य
५१ यात्माभूतानामीश्वरोपिसन् ॥ प्रकृतिंस्वा
मधिष्ठायसंभवाम्यात्ममायया ॥ ६ ॥ यदा
यदाहिधर्मस्यग्लानिर्भवतिभारत ॥ अ॰

भ्युत्थानमधर्मस्यतदात्मानंसृजाम्य
हम्॥७॥परित्राणायसाधूनांविनाशाय
चदुष्कृताम्॥धर्मसंस्थापनार्थायसं
भवामियुगेयुगे॥८॥जन्मकर्मचमेदिव्य
मेवंयोवेत्तितत्त्वतः॥त्यक्त्वादेहंपुनर्जन्म

103

गी. नैतिमामेतिसोर्ज्जुन॥९॥वीतरागभयक्रो
च. धामन्मयामामुपाश्रिताः॥बहवोज्ञान
५२ तपसापूतामद्भावमागताः॥१०॥येयथा
मांप्रपद्यंतेतांस्तथैवभजाम्यहम् ममव
र्त्मानुवर्तंतेमनुष्याःपार्थसर्वशः॥११॥कां

ह्नंतः कर्मणां सिद्धिं यजंत इह देवताः॥ क्षि
प्रं हि मानुषे लोके सिद्धिर्भवति कर्मजा
१२॥ चातुर्वर्ण्यं मया सृष्टं गुणकर्मवि
भागशः॥ तस्य कर्तारमपि मां विद्ध्यकर्ता
रमव्ययं॥१३॥ न मां कर्माणि लिंपंति न मे

105

गी. कर्मफलेस्पृहा॥इतिमांयोभिज्ञानाति
च. कर्मभिर्नेसबध्यते॥१४॥एवंज्ञात्वाकृतं
प्र. कर्मपूर्वैरपिमुमुक्षुभिः॥कुरुकर्मैवत
स्मात्त्वंपूर्वैःपूर्वतरंकृतम्॥१५॥किंकर्म
किमकर्मेतिकवयोप्यत्रमोहिता॥त

तेकर्मप्रवक्ष्यामि यज्ज्ञात्वामोक्ष्यसेशुभा
त्॥१६॥कर्मणोह्यपिबोद्धव्यंबोद्धव्यंचवि
कर्मणः॥अकर्मणश्चबोद्धव्यंगहनाक
र्मणोगतिः॥१७॥कर्मण्यकर्मयःपश्येद
कर्मणिचकर्मयः॥सबुद्धिमान्मनुष्येषु

107

गी. च. ५४

सयुक्तः कृत्स्नकर्मकृत ॥१८॥ यस्यसर्वे
समारंभाः कामसंकल्पवर्जिताः ॥ ज्ञा
नाग्निदग्धकर्माणंतमाहुः पंडितंबु
धाः ॥१९॥ त्यक्त्वाकर्मफलासंगंनित्यतृ
प्तोनिराश्रयः ॥ कर्मण्यभिप्रवृत्तोपिनैव

किंचित्करोतिसः ॥२१॥ निराशीर्यतचित्ता
त्मात्यक्तसर्वपरिग्रहः ॥ शारीरंकेव
लंकर्मकुर्वन्नाप्नोतिकिल्बिषम् ॥२२॥ य
दृच्छालाभसंतुष्टोद्वंद्वातीतोविमत्सरः
समःसिद्धावसिद्धौचकृत्वापिननिबध्य

109

गी॰ ते॥२२॥ गतसंगस्य मुक्तस्य ज्ञानावस्थित
व॰ चेतसः॥ यज्ञायाचरतः कर्म समग्रं प्रवि
५५ लीयते॥२३॥ ब्रह्मार्पणं ब्रह्म हविर्ब्रह्मा
ग्नौ ब्रह्मणा हुतं॥ ब्रह्मैव तेन गंतव्यं ब्र
ह्म कर्म समाधिना॥२४॥ दैवमेवापरे यज्ञं

योगिनः पर्युपासते ॥ ब्रह्माग्नावपरे यज्ञं
यज्ञेनैवोपजुह्वति ॥ २५ ॥ श्रोत्रादीनींद्रि
याण्यन्ये संयमाग्निषु जुह्वति ॥ शब्दादी
न्विषयानन्ये इंद्रियाग्निषु जुह्वति ॥ २६ ॥
सर्वाणींद्रियकर्माणि प्राणकर्माणि चा

गी॰
ब॰
५६

परे॥ आत्मसंयमयोगाग्नौ जुह्वति ज्ञाना
दीपिते॥२७॥ द्रव्ययज्ञास्तपोयज्ञा योगय
ज्ञास्तथापरे॥ स्वाध्यायज्ञानयज्ञाश्च यत
यः संशितव्रताः॥२८॥ अपाने जुह्वति
प्राणं प्राणेऽपानं तथापरे॥ प्राणापानग

तीरुद्ध्वा प्राणायामपरायणाः ॥ अपरे नि
यताहाराः प्राणान्प्राणेषु जुह्वति ॥ सर्वे
प्येते यज्ञविदो यज्ञक्षपितकल्मषाः ॥ ३० ॥
यज्ञशिष्टामृतभुजो यांति ब्रह्म सनातनम्
नाये लोकोस्त्ययज्ञस्य कुतोन्यः कुरुस

113

गी०
च०
५९

त्तम॥३१॥ एवं बहुविधा यज्ञा वितता ब्र
ह्मणो मुखे॥ कर्मजान्विद्धि तान्सर्वाने
वं ज्ञात्वा विमोक्ष्यसे॥३२॥ श्रेयान्द्रव्यम
याद्यज्ञाज्ज्ञानयज्ञः परंतप॥ सर्वं कर्मा
खिलं पार्थ ज्ञाने परिसमाप्यते॥३३॥ त

द्धि द्धि प्रणिपातेन परिप्रश्नेन सेवया ॥ उ
पदेक्ष्यंति ते ज्ञानं ज्ञानिनस्तत्वदर्शिन
॥ः३४॥ यज्ज्ञात्वा न पुनर्मोहमेवं यास्यसि पा
ण्डव ॥ येन भूतान्यशेषेण द्रक्ष्यस्यात्म
न्यथो मयि ॥३५॥ अपि चेदसि पापेभ्यः

115

गी. सर्वेभ्यःपापकृत्तमः॥सर्वंज्ञानप्लवेनैव
च. वृजिनंसंतरिष्यसि॥यथैधांसिसमि-
५८ द्धोग्निर्भस्मसात्कुरुतेर्जुन॥ज्ञानाग्निः
सर्वकर्माणिभस्मसात्कुरुतेतथा॥३७॥
नहिज्ञानेनसदृशंपवित्रमिहविद्यते

तत्स्वयंयोगसंसिद्धःकालेनात्मनिविं
दति॥३८॥श्रद्धावांल्लभतेज्ञानंतत्परः
संयतेंद्रियः॥ज्ञानंलब्ध्वापरांशांतिम
चिरेणाधिगच्छति॥३९॥अज्ञश्चाश्र
द्दधानश्चसंशयात्माविनश्यति॥न

गी. यंलोकोस्तिनपरोनसुखंसंशयात्मनः

व. ४०॥योगसंन्यस्तकर्माणंज्ञानसंछिन्नसं

५५ शयम्॥आत्मवंतंनकर्माणिनिबध्नंतिध

नंजय॥४१॥तस्मादज्ञानसंभूतंहृत्स्थं

ज्ञानासिनात्मनः॥छित्वैनंसंशयंयोग

मिति श्रीमहाभारते ॥ ॥ इति श्रीभगव
द्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे कर्मसंन्यासयो
गो नाम पंचमोध्यायः ॥५॥ अर्जुन उवाच ॥
संन्यासं कर्मणां कृष्ण पुनर्योगं च शंससि

119

गी. यच्छ्रेयएतयोरेकंतन्मेब्रूहिसुनिश्चितम् ॥
अ. ॥१॥ श्रीभगवानुवाच ॥ संन्यासःकर्मयोग
५. श्चनिःश्रेयसकरावुभौ ॥ तयोस्तुक
र्मसंन्यासात्कर्मयोगोविशिष्यते ॥२॥ ज्ञेयः
सनित्यसंन्यासीयोनद्वेष्टिनकांक्षति ॥

निर्द्वंद्वोहिमहाबाहोसुखंबंधात्प्रमुच्य
ते॥३॥सांख्ययोगौपृथग्बालाःप्रवदंति
नपंडिताः॥एकमप्यास्थितःसम्यगुभयो मं
र्विंदतेफलम्॥४॥यत्सांख्यैःप्राप्यतेस्था
नंतद्योगैरपिगम्यते॥एकंसांख्यंचयोगं

121

गी चयःपश्यतिसपश्यति॥५॥संन्यासस्तु
पं. महाबाहोदुःखमाप्तुमयोगतः॥योग
६१ युक्तोमुनिर्ब्रह्मनचिरेणाधिगच्छति॥
॥योगयुक्तोविशुद्धात्माविजितात्माजि
तेंद्रिय॥सर्वभूतात्मभूतात्माकुर्वन्नपि

122

नलिप्यते॥ ॥नैवकिंचित्करोमीतियु

क्तोमन्येततत्त्ववित्॥पश्यञ्शृण्वन्स्पृ

शंजिघ्रन्नश्नन्गच्छन्स्वपन्श्वसन्॥ ॥प्र

लपन्विसृजन्गृह्णन्नुन्मिषन्निमिषन्न

पि॥इंद्रियाणींद्रियार्थेषुवर्तंतइतिधा

123

गी.
पु.
६२

रयन्॥९॥ब्रह्मण्याधायकर्माणिसंगंत्य
क्त्वाकरोतियः॥लिप्यतेनसपापेनप
द्मपत्रमिवांभसा॥१०॥कायेनमनसाबु
द्ध्याकेवलैरिंद्रियैरपि॥योगिनःकर्म
कुर्वंतिसंगंत्यक्त्वात्मशुद्धये॥११॥युक्तः

कर्मफलंत्यक्त्वाशांतिमाप्नोतिनैष्ठि
कीम्॥अयुक्तःकामकारेणफलेस
क्तोनिबध्यते॥१२॥सर्वकर्माणिमनसा
संन्यस्यास्तेसुखंवशी॥नकर्तृत्वंनका
र्माणिलोकस्यसृजतिप्रभुः॥नवद्वारेपु

125

न कर्तृत्वं न कर्माणि
लोकस्य सृजति प्रभुः

गी. रे देही नैव कुर्वन्न कारयन् ॥ १३ ॥ न कर्मफ
प. लसंयोगं स्वभावस्तु प्रवर्तते ॥ १४ ॥ नाद
६२ त्ते कस्यचित्पापं न चैव सुकृतं विभुः ॥
अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः
१५ ॥ ज्ञानेन तु तदज्ञानं येषां नाशितमात्म

नः॥तेषमादित्यवज्ज्ञानेप्रकाशयतित
त्परं॥१६॥तद्बुद्धयस्तदात्मानस्तन्निष्ठा
स्तत्परायणाः॥गच्छंत्यपुनरावृत्तिंज्ञा
ननिर्धूतकल्मषाः॥१७॥विद्याविनयसं
पन्नेब्राह्मणेगविहस्तिनि॥शुनिचैवश्व

127

गी. पाकेचपंडिताःसमदर्शिनः॥१८॥इहैवतै
प. र्जितःसर्गोयेषांसाम्येस्थितंमनः॥निर्दो
१८ षंहिसमंब्रह्मतस्माद्ब्रह्मणितेस्थिताः
॥१९॥नप्रहृष्येत्प्रियंप्राप्यनोद्विजेत्प्राप्य
चाप्रियम्॥स्थिरबुद्धिरसंमूढोब्रह्मवि

128

ब्रह्मणिस्थितः ॥२०॥ बाह्यस्पर्शेष्वसक्ता
त्माविंदत्यात्मनियत्सुखम् ॥ सब्रह्मयोग
युक्तात्मासुखमक्षयमश्नुते ॥२१॥ येहि
संस्पर्शजाभोगाः दुःखयोनयएवते ॥ आ
द्यंतवंतःकौंतेयनतेषुरमतेबुधः ॥२२॥

129

गी. शक्नोतीहैव यः सोढुं प्राक्छरीरविमोक्ष
प. णात्॥ कामक्रोधोद्भवं वेगं स युक्तः स सु
६५ खी नरः॥२३॥ योंतःसुखोंतरारामस्तथां
तर्ज्योतिरेव यः॥ स योगी ब्रह्मनिर्वाणं
ब्रह्मभूतोधिगच्छति॥२४॥ लभंते ब्रह्म

निर्वाणमृषयःक्षीणकल्मषाः।छिन्नद्वै
धायतात्मानःसर्वभूतहितेरताः॥२५॥
कामक्रोधविमुक्तानांयतीनांयतचेतसा
म्॥अभितोब्रह्मनिर्वाणंवर्ततेविदितात्म
नाम्॥२६॥स्पर्शान्कृत्वाबहिर्बाह्यांश्चक्ष

गी. श्चैवांतरे भ्रुवो: ॥ प्राणापानौ समौ कृत्वा
६६ नासाभ्यंतरचारिणौ ॥ २७ ॥ यतेंद्रियमनोबुद्धि
प. र्मुनिर्मोक्षपरायण: ॥ विगतेच्छाभयक्रो
धो य: सदा मुक्त एव स: ॥ २८ ॥ भोक्तारं य
ज्ञतपसां सर्वलोकमहेश्वरम् ॥ सुहृदं

सर्वभूतानां ज्ञात्वा मां शान्तिमृच्छति॥२
तिश्रीभगवद्गीतासूपनिषत्सु ब्रह्मवि
द्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे सं
न्यासयोगो नाम पंचमोध्यायः ५ ॥ श्री
भगवानुवाच॥ अनाश्रितः कर्मफलं का

133

गी. यंकर्मकरोतियः॥ससंन्यासीचयोगीच
पु. निरग्निर्नचाक्रियः॥१॥यंसंन्यासमिति
६ प्राहुर्योगंतंविद्धिपाण्डव॥नह्यसंन्यस्त
संकल्पोयोगीभवतिकश्चन॥२॥आरुरु
क्षोर्मुनेर्योगंकर्मकारणमुच्यते।योगारू

ढस्यतस्यैव शमः कारणमुच्यते ॥३॥ यदा
हिनेंद्रियार्थेषु न कर्मस्वनुषज्जते ॥ सर्व
संकल्पसंन्यासी योगारूढस्तदोच्यते ४
उद्धरेदात्मनात्मानं नात्मानमवसादयेत्
आत्मैव ह्यात्मनो बंधुरात्मैव रिपुरात्मनः ५

135

गी- बंधुरात्मात्मनस्तस्य येनात्मैवात्मनाजि
६ तः ॥ अनात्मनस्तु शत्रुत्वे वर्तेतात्मैव श
६८ त्रुवत् ॥६॥ जितात्मनः प्रशान्तस्य परमा
त्मा समाहितः ॥ शीतोष्णसुखदुःखेषु
तथा मानापमानयोः ॥७॥ ज्ञानविज्ञान

तृप्तात्मा कूटस्थो विजितेंद्रियः युक्त

त्युच्यते योगी समलोष्टाश्मकांचनः ॥८॥

सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबंधु

षु ॥ साधुष्वपि च पापेषु समबुद्धिर्विशि

ष्यते ॥ योगी युंजीत सततमात्मानं रहसि

गी. स्थितः ॥ एकाकी यतचित्तात्मा निराशी
ष. रपरिग्रहः ॥ १० ॥ शुचौ देशे प्रतिष्ठाप्य ।
६९ स्थिरमासनमात्मनः ॥ नात्युच्छ्रितं ना
तिनीचं चैलाजिनकुशोत्तरम् ॥ ११ ॥ तत्रै
काग्रं मनः कृत्वा यतचित्तेंद्रियक्रियः

उपविश्यासनेयुंज्याद्योगमात्मविशुद्ध
ये॥१२॥समंकायशिरोग्रीवंधारयन्नचलंस्थि ले
र॥संप्रेक्ष्यनासिकाग्रंस्वंदिशश्चानव
लोकयन्॥१३॥प्रशान्तात्माविगतभीर्ब्रह्मचा
रिव्रतेस्थितः॥मनःसंयम्यमच्चित्तोयुक्त

युञ्जन्नेवं सदात्मानं योगी नियतमानस

139

गी. आसीत मत्परः ॥ शांतिं निर्वाणपरमां म
ष त्संस्थामधिगच्छति ॥ [redacted]
२. [redacted] ॥१५॥ नात्यश्न
तस्तु योगोस्ति न चैकांतमनश्नतः न
चातिस्वप्नशीलस्य जाग्रतो नैव चार्जुन

१६॥ युक्ताहारविहारस्ययुक्तचेष्टस्यक
र्मसु॥युक्तस्वप्नावबोधस्ययोगोभवति
दुःखहा १७ यदाविनियतंचित्तमात्म
न्येवावतिष्ठते निःस्पृहःसर्वकामेभ्यो
युक्तइत्युच्यतेतदा १८ यथादीपोनिवा

141

गी. तस्थो नेंगते सोपमा स्मृता ॥ योगिनो यतचि
घ. त्तस्य युंजतो योगमात्मनः ॥ १९ ॥ यत्रोपर
६९ मते चित्तं निरुद्धं योगसेवया ॥ यत्र चैवा
त्मनात्मानं पश्यन्नात्मनि तुष्यति ॥ २० ॥ स
खमात्यंतिकं यत्तद्बुद्धिग्राह्यमतींद्रियं

वेत्तियत्रनचैवायंस्थितस्तुलतिततत॥
२॥येलब्ध्वापरंलाभमन्यतेनाधिकंततः
यस्मिंस्थितोनदुःखेनगुरुणापिविचा
ल्यते॥२३॥तंविद्यादुःखसंयोगवियोगं
योगसंज्ञितम्॥सनिश्चयेनयोक्तव्योयो

143

गी. योगोनिर्विंस्रचेतसा ॥ २३ ॥ संकल्पप्रभवा
प. न्कामांस्त्यक्त्वा सर्वानशेषतः ॥ मनसैवें
७२ द्रियग्रामं विनियम्य समंततः ॥ २४ ॥ शनैः
शनैरुपरमेद्बुद्ध्या धृतिगृहीतया आ
त्मसंस्थं मनः कृत्वा न किंचिदपि चिंतये

त् ॥ २५ ॥ यतो यतो निश्चरति मनश्चंचल
मस्थिरम् ॥ ततस्ततो नियम्यैतदात्मन्ये
व वशं नयेत् ॥ २६ ॥ प्रशान्तमनसं ह्येनं
योगिनं सुखमुत्तमम् ॥ उपैति शान्तरज
सं ब्रह्मभूतमकल्मषम् ॥ २७ ॥ युंजन्नेवं स

गी- दात्मानं योगी विगतकल्मषः सुखेन
ष· ब्रह्मसंस्पर्शमत्यन्तं सुखमश्नुते ॥२८॥
२५ सर्वभूतस्थमात्मानं सर्वभूतानि चात्म
नि ईक्षते योगयुक्तात्मा सर्वत्र सम
दर्शनः ॥२९॥ यो मां पश्यति सर्वत्र म

वँचमयिपश्यति॥तस्याहंनप्रणश्या
मिसचमेनप्रणश्यति॥३०॥सर्वभूत
स्थितंयोमांभजत्येकत्वमास्थित॥सर्व
थावर्तमानोपिसयोगीमयिवर्तते॥३१॥
आत्मौपम्येनसर्वत्रसमंपश्यतियोर्जुन

147

गी॰ सुखंवायदिवादुःखंसयोगीपरमोमतः

ष॰ ॥३२॥ अर्जुनउवाच॥ योयंयोगस्त्वयाप्रो

७४ क्तःसाम्येनमधुसूदन एतस्याहंनपश्या

मिचंचलत्वात्स्थितिंस्थिराम्॥३३॥ चंचलं

हिमनःकृष्णप्रमाथिबलवद्दृढम्॥ त

स्याहं निग्रहं मन्ये वायोरिव सुदुष्करम् ३४
श्रीभगवानुवाच । असंशयं महाबाहो मनो
दुर्निग्रहं चलम् ॥ अभ्यासेन तु कौंतेय
वैराग्येण च गृह्यते ॥३५॥ असंयतात्मना
योगो दुष्प्राप इति मे मतिः वश्यात्मना तु

य

149

गी. यतताशक्योवाप्तुमुपायतः॥३६॥अर्जुन उ

छ. वाच॥अयतिःश्रद्धयोपेतोयोगाच्चलित

७५ मानसः॥अप्राप्ययोगसंसिद्धिंकांगतिं

कृष्णगच्छति॥३७॥कच्चिन्नोभयविभ्र

ष्टश्छिन्नाभ्रमिवनश्यति॥अप्रतिष्ठोम

श्री

हाबाहो विमूढो ब्रह्मणः पथि ॥ ३८ ॥ ए
तन्मे संशयं कृष्ण छेत्तुमर्हस्यशेषतः
त्वदन्यः संशयस्यास्य छेत्ता न ह्यु
पपद्यते ॥ ३९ ॥ श्रीभगवानुवाच ॥ पार्थ नैवे
ह नामुत्र विनाशस्तस्य विद्यते ॥ न हि क

151

गी. ल्याणकृत्कश्चिद्दुर्गतिंतातगच्छति॥४०॥प्रा
ष. प्यपुण्यकृतांलोकानुषित्वाशाश्वतीःस
२६ माः॥शुचीनांश्रीमतांगेहेयोगभ्रष्टोभि
जायते॥४१॥अथवायोगिनामेवकुलेभव
तिधीमताम्॥एतद्धिदुर्लभतरंलोकेजन्मय

दीदृशम् ४२ ॥ तत्र तं बुद्धिसंयोगं लभते पौ
र्वदेहिकम् ॥ यतते च ततो भूयः संसिद्धौ कु
रुनंदन ॥ ४३ ॥ पूर्वाभ्यासेन तेनैव ह्रियते ह्य
वशोपि सन् ॥ जिज्ञासुरपि योगस्य शब्द
ब्रह्मातिवर्तते ॥ ४४ ॥ प्रयत्नाद्यतमानस्तु यो

153

गी. गीसंशुद्धकिल्बिषः॥ अनेकजन्मसंसि
ष. द्धस्ततोयातिपरांगतिं॥४५॥ तपस्विभ्यो
धिकोयोगीज्ञानिभ्योपिमतोधिकः॥ कर्मि
भ्यश्चाधिकोयोगीतस्माद्योगीभवार्जुन
॥४६॥ योगिनामपिसर्वेषांमद्गतेनांतरा

त्मना॥ श्रद्धावान्भजते यो मां स मे युक्त
तमो मतः॥४७॥ इति श्रीभगवद्गीतासूप
निषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृ
ष्णार्जुनसंवादे आत्मसंयमयोगो नाम षष्ठो
ध्यायः॥६॥ श्रीभगवानुवाच। मय्यासक्तम

गी नाः पार्थयोगंयुंजन्मदाश्रयः॥असंश
स॰ यंसमग्रंमांयथाज्ञास्यसितच्छृणु॥१॥
२८ ज्ञानंतेहंसविज्ञानमिदंवक्ष्याम्यशेषत
यज्ज्ञात्वानेहभूयोन्यज्ज्ञातव्यमवशिष्य
ते॥२॥मनुष्याणांसहस्रेषुकश्चिद्यतति

सिद्धये॥यततामपिसिद्धानांकश्चिन्मांवे
त्तितत्त्वतः॥३॥भूमिरापोनलोवायुःखंम
नोबुद्धिरेवच अहंकारइतीयंमेभिन्ना
प्रकृतिरष्टधा॥४॥अपरेयमितस्त्वन्यां
प्रकृतिंविद्धिमपरां॥जीवभूतांमहाबा

157

गी. हो ययेदं धार्यते जगत् ॥५॥ एतद्योनीनि
म. भूतानि सर्वाणीत्युपधारय ॥ अहं कृत्स्न
२९ स्य जगतः प्रभवः प्रलयस्तथा ॥६॥ मत्तः
परतरं नान्यत्किंचिदस्ति धनंजय ॥ मयि
सर्वमिदं प्रोतं सूत्रे मणिगणा इव ॥७॥ रसो

हमप्सु कौंतेय प्रभास्मि शशिसूर्ययोः । प्र
णवः सर्ववेदेषु शब्दः खे पौरुषं नृषु ॥८॥ पु
ण्यो गंधः पृथिव्यां च तेजश्चास्मि विभावसौ ।
जीवनं सर्वभूतेषु तपश्चास्मि तपस्विषु ॥९॥
बीजं मां सर्वभूतानां विद्धि पार्थ सनातनम्

159

गी. र्बुद्धिर्बुद्धिमतामस्मितेजस्तेजस्विनाम
स. हं॥१०॥बलंबलवतांचाहंकामरागविव
ए. र्जितम्॥धर्माविरुद्धोभूतेषुकामोस्मिभर
तर्षभ॥११॥येचैवसात्विकाभावाराजसा
स्तामसाश्चये॥मत्तएवेतितान्विद्धि नत्वहं

तेषुतेमयि॥ त्रिभिर्गुणमयैर्भावैरेभिःसर्व
मिदंजगत्॥ मोहितंनाभिजानातिमामेभ्य
परमव्ययं॥१३॥ दैवीह्येषागुणमयीममम
यादुरत्यया॥ मामेवयेप्रपद्यंतेमायामेतांतर
न्तिते॥१४॥ नमांदुष्कृतिनोमूढाःप्र पद्यंतेनरा
पधं

16

गी. धमाः॥ माययापहृतज्ञाना आसुरं भावमाश्रि
स. ताः॥१५॥ चतुर्विधा भजन्ते मां जनाः सुकृति
७ नोऽर्जुन॥ आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भर
तर्षभ॥१६॥ तेषां ज्ञानी नित्ययुक्त एकभक्तिर्वि
शिष्यते॥ प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम

नी

प्रियः ॥१७॥ उदाराः सर्व एवैते ज्ञानी त्वात्मैवमम
तं ॥ आस्थितः स हि युक्तात्मा मामेवानुत्तमां
गतिम् ॥१८॥ बहूनां जन्मनामन्ते ज्ञानवान्मां
प्रपद्यते ॥ वासुदेवः सर्वमिति स महात्मा
सुदुर्लभः ॥१९॥ कामैस्तैस्तैर्हृतज्ञानाः प्र

गी. पद्यंतेन्यदेवता ॥ तंतंनियममास्थायप्रकृ
स. त्यानियताःस्वया ॥२०॥ योयोयांयांतनुंभक्तः
८२ श्रद्धयार्चितुमिच्छति ॥ तस्यतस्याचलां
श्रद्धांतामेवविदधाम्यहम् ॥२१॥ सतयाश्र
द्धयायुक्तस्तस्याराधनमीहते ॥ लभतेचतत

न:कामामैवविहिताहितान् ॥२२॥ अंत
वत्तुफलंतेषांतद्भवत्यल्पमेधसाम् ॥ दे
वांदेवयजोयांतिमद्भक्तायांतिमामपि ॥
२३॥ अव्यक्तंव्यक्तिमापन्नंमन्यंतेमामबु
द्धय ॥ परंभावमजानंतोममाव्ययमनुत्तमं २७

165

गी. नाहंप्रकाशःसर्वस्ययोगमायासमावृ
स. तः॥मूढोयंनाभिजानातिलोकोमामज
८३ मव्ययम्॥२५॥वेदाहंसमतीतानिवर्त
मानानिचार्जुन॥भविष्याणिचभूतानि
मांतुवेदनकश्चन॥२६॥इच्छाद्वेषसमु

त्थेनद्वंद्वमोहेनभारत॥सर्वभूतानिसं
मोहंसर्गेयांतिपरंतप॥२७॥येषांत्वंतग
तंपापंजनानांपुण्यकर्मणाम्॥तेद्वंद्व
मोहनिर्मुक्ताभजंतेमांदृढव्रताः॥२८॥
जरामरणमोक्षायमामाश्रित्ययतंतिये

167

गी. तेब्रह्मतद्विदुःकृत्स्नमध्यात्मंकर्मचा
स. खिलम्॥२९॥साधिभूताधिदैवंमांसा
७४ धियज्ञंचयेविदुः॥प्रयाणकालेपिच
मांतेविदुर्युक्तचेतसः॥३॥ इतिश्रीभ
गवद्गीतासूप निषत्सुब्रह्मविद्यायांयो

गीता स्वेश्री कृष्णार्जुनसंवादे [illegible]मे दोनाम
सप्तमोध्यायः ७ अर्जुनउवाच किंतद्ब्रह्मकि
मध्यात्मं किंकर्मपुरुषोत्तम॥ अधिभूतंच
किंप्रोक्तमधिदैवंकिमुच्यते १॥ अधियज्ञ
ज्ञः कथंकोत्रदेहेस्मिन्मधुसूदन॥ प्रया।

ज्ञानविज्ञान योगोनाम

पि

169

गी. णकालेचकथंज्ञेयोसिनियतात्मभिः॥२॥
अ. श्रीभगवानुवाच॥ अक्षरंब्रह्मपरमंस्वभा
८५ वोध्यात्ममुच्यते॥भूतभावोद्भवकरोविस
र्गः कर्मसंज्ञितः॥३॥ अधिभूतंक्षरोभावः
पुरुषश्चाधिदैवतम्॥अधियज्ञोहमेवात्र

देहेदेहभृतांवर॥४॥ अंतकालेचमामेव

स्मरन्मुक्त्वाकलेवरम्॥ यःप्रयातिसमद्भा

वंयातिनास्त्यत्रसंशयः॥५॥ यंयंवापि

स्मरंभावंत्यजत्यंतेकलेवरम्॥ तंतमेवैति

कौंतेयसदातद्भावभावित॥६॥ तस्मात्स

र्वेषुकालेषु मामनुस्मरयुध्यच ॥ मय्यर्पि
तमनोबुद्धिर्मामेवैष्यस्यसंशयः ॥७॥ अ
भ्यासयोगयुक्तेन चेतसानान्यगामिना
परमंपुरुषंदिव्यंयातिपार्थानुचिंतयन्
॥८॥ कविंपुराणमनुशासितारमणोर

णीयांसमनुस्मरेद्यः ।। सर्वस्यधातारम
चिंत्यरूपमादित्यवर्णंतमसः परस्तात ९
प्रयाणकालेमनसाचलेनभक्त्यायुक्तो
योगबलेनचैव ।। भ्रुवोर्मध्येप्राणमावेश्य
सम्यक्सतंपरंपुरुषमुपैतिदिव्यम ।। १० ।।

173

गी. अ. ८

यदक्षरंवेदविदोवदंतिविशंतियद्यत।
योवीतरागाः॥यदिच्छंतोब्रह्मचर्यंचरंति
तत्तेपदंसंग्रहेणप्रवक्ष्ये॥११॥सर्वद्वारा
णिसंयम्यमनोहृदिनिरुध्यच॥मूर्ध्न्या
धायात्मनःप्राणमास्थितोयोगधारणा।

णां॥ ओमितेकाक्षरंब्रह्मव्याहरंमामनु
स्मरन्॥ यःप्रयातित्यजंदेहंसयातिपर
मांगतिं॥१३॥ अनन्यचेताःसततंयोमां
स्मरतिनित्यशः॥ तस्याहंसुलभःपार्थ
नित्ययुक्तस्ययोगिनः॥१४॥ मामुपेत्यपुन

गी. र्जन्मदुःखालयमशाश्वतम्॥नाप्नुवंतिम
अ. हात्मानः संसिद्धिं परमां गताः॥१५॥आब्र
८ ह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन मा
मुपेत्य तु कौंतेय पुनर्जन्म न विद्यते॥१६॥
सहस्रयुगपर्यंतमहर्यद्ब्रह्मणो विदुः

रात्रिंयुगसहस्रांतांतेहोरात्रविदोजना॥
अव्यक्ताद्व्यक्तयःसर्वाःप्रभवंत्यहराग
मे॥रात्र्यागमेप्रलीयंतेतत्रैवाव्यक्तसंज्ञके
भूतग्रामःसएवायंभूत्वाभूत्वाप्रलीयते
रात्र्यागमेवशःपार्थप्रभवंत्यहरागमे॥९॥

177

गी परस्तस्मात्तु भावोन्योव्यक्तोव्यक्तात्स
अ नातनः ॥ यः ससर्वेषु भूतेषु नश्यत्सु नवि
८९ नश्यति ॥ २० ॥ अव्यक्तोक्षर इत्युक्तस्तमा
हुः परमां गतिम् । यंप्राप्य ननिवर्त्तन्ते तद्धा
मपरमंमम ॥ २१ ॥ पुरुषः सपरः पार्थभक्त्या

लभ्यस्त्वनन्यया॥यस्यान्तःस्थानिभूतानि
येनसर्वमिदंततम्॥२२॥यत्रकालेत्वनावृ
त्तिमावृत्तिंचैवयोगिनः॥प्रयातायान्तितं
कालंवक्ष्यामिभरतर्षभ॥२३॥अग्निर्ज्योति
तिरहःशुक्लःषण्मासाउत्तरायणम्॥तत्र

179

गी. प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः ॥२४
अ. धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणा
८. यनम् ॥ तत्र चान्द्रमसं ज्योतिर्योगी प्राप्य नि
वर्तते ॥२५॥ शुक्लकृष्णे गती ह्येते जगतः
शाश्वते मते ॥ एकया यात्यनावृत्तिमन्यया

वर्त्तेपुनः॥२६॥नैतेसृतीपार्थजानन्यो
गीमुह्यतिकश्चन॥तस्मात्सर्वेषुकालेषु
योगयुक्तोभवार्जुन॥२७॥वेदेषुयज्ञेषुत
पःसुचैवदानेषुयत्पुण्यफलंप्रदिष्टम्
अत्येतितत्सर्वमिदंविदित्वायोगीपरंस्था

181

गी. नमुपैति चाद्यम् ॥२८॥ इति श्रीभगवद्गी
अ. तासूपनिषत्सु ब्रह्मविद्यायां योगशा
८८ स्त्रे श्रीकृष्णार्जुनसंवादे ॥ तारकनिर्देशो ना
माष्टमोऽध्यायः ॥८॥

॥ॐ श्रीभगवानुवाच॥ इदंतुतेगुह्यतमं
प्रवक्ष्याम्यनसूयवे॥ ज्ञानंविज्ञानसहि
तंयज्ज्ञात्वामोक्ष्यसेऽशुभात्॥१॥ राजवि
द्याराजगुह्यंपवित्रमिदमुत्तमं॥ प्रत्य
क्षावगमंधर्म्यंसुसुखंकर्तुमव्ययं॥२॥

183

गी. न. ५१

अश्रद्दधानाः पुरुषा धर्मस्यास्य परंत
प ॥ अप्राप्य मां निवर्तन्ते मृत्युसंसारवर्त्म
नि ॥ ३ ॥ मया ततमिदं सर्वं जगदव्यक्तमू
र्तिना ॥ मत्स्थानि सर्वभूतानि न चाहं तेष्व
वस्थितः ॥ ४ ॥ न च मत्स्थानि भूतानि प

श्यमेयोगमैश्वरं॥भूतभृन्नचभूतस्थोमम
मात्माभूतभावनः॥५॥यथाकाशस्थि
तोनित्यंवायुःसर्वत्रगोमहान्॥तथास
र्वाणिभूतानिमत्स्थानीत्युपधारय॥६॥
सर्वभूतानिकौन्तेयप्रकृतिंयान्तिमाम

185

गी.
नं.
५१

कौ॥ कल्पक्षये पुनस्तानि कल्पादौ वि
सृजाम्यहम्॥७॥ प्रकृतिं स्वामवष्टभ्य
विसृजामि पुनः पुनः॥ भूतग्राममिमं
कृत्स्नमवशं प्रकृतेर्वशात्॥८॥ न च मां
तानि कर्माणि निबध्नंति धनंजय॥९

दासीनवदासीनमसक्तंतेषुकर्मसु॥९
मयाध्यक्षेणप्रकृतिःसूयतेसचराच
रम्॥हेतुनानेनकौंतेयजगद्विपरिवर्त
ते॥१०॥अवजानंतिमांमूढामानुषींतनु
माश्रितम्॥परंभावमजानंतोममभूत

187

गी. महेश्वरम् ॥ ११ ॥ मोघाशामोघकर्माणोमोघ
न. ज्ञानाविचेतसः ॥ राक्षसीमासुरींचैवप्रकृ
९४ तिंमोहिनींश्रिताः ॥ १२ ॥ महात्मानस्तु
मांपार्थदैवींप्रकृतिमाश्रिताः ॥ भजंत्यन
न्यमनसोज्ञात्वाभूतादिमव्ययं ॥ १३ ॥ सतत

तंकीर्तयन्तोमांयतन्तश्चदृढव्रताः॥नम
स्यन्तश्चमांभक्त्यानित्ययुक्ताउपासते॥४॥ ४
ज्ञानयज्ञेनचाप्यन्येयजन्तोमाउपासते
एकत्वेनपृथक्त्वेनबहुधाविश्वतोमुखम्
॥५॥अहंक्रतुरहंयज्ञः स्वधाहमहमौषध ५

189

गी॰ न

मंत्रोहमहमेवाज्यमहमग्निरहंहुतम्
॥१६॥ पिताहमस्यजगतोमाताधातापि
तामहः॥ वेद्यंपवित्रमोंकारऋक्साम
यजुरेवच॥१७॥ गतिर्भर्ताप्रभुःसाक्षीनि
वासःशरणंसुहृत॥ प्रभवःप्रलयःस्था

नेनिधानंबीजमव्ययं॥१८॥तपाम्यहमहं
वर्षंनिगृह्णाम्युत्सृजामिच॥अमृतंचैव मु०
मृत्युश्चसदसच्चाहमर्जुन॥१९॥त्रैविद्या
मांसोमपाःपूतपापायज्ञैरिष्ट्वास्वर्गतिं
प्रार्थयंते॥तेपुण्यमासाद्यसुरेंद्रलोक

गी॰ मश्नंति दिव्यांदिवि देवभोगान् ॥ २० ॥ ते तं भु

न॰ क्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये म

९५ र्त्यलोकं विशंति ॥ एवं त्रयीधर्ममनुप्रप ५

न्ना गतागतं कामकामा लभंते ॥ २१ ॥ अन

न्याश्चिंतयंतो मां ये जनाः पर्युपासते ॥ ते

षां नित्याभियुक्तानां योगक्षेमं वहाम्यह
म् ॥ २२ ॥ येप्यन्यदेवता भक्ता यजंते श्रद्ध
यान्विताः ॥ तेपि मामेव कौंतेय यजंत्यवि
धिपूर्वकं ॥ २३ ॥ अहं हि सर्वयज्ञानां भोक्ता
च प्रभुरेव च ॥ न तु मामभिजानंति तत्त्वेना

193

गी. तःच्यवंतिते॥ यांतिदेवव्रतादेवान्पितॄ
न. न्यांतिपितृव्रताः॥भूतानियांतिभूतेज्या
यांतिमद्याजिनोपिमाम्॥२५॥पत्रंपुष्पं ६
फलंतोयं॥योमेभक्त्याप्रयच्छति॥तद
हंभक्त्युपहृतमश्नामिप्रयतात्मनः॥२६

यत्करोषियदश्नासियज्जुहोषिददासि
यत्॥ यत्तपस्यसिकौन्तेयतत्कुरुष्वमदर्प
णम्॥ शुभाशुभफलैरेवंमोक्ष्यसेकर्मबं
धनैः॥ संन्यासयोगयुक्तात्माविमुक्तोमा
मुपैष्यसि॥२८॥ समोहंसर्वभूतेषुनमेद्वेष्यो

गी- स्तिनप्रियः॥ येभजंतिमांभक्त्यामयिते
न: तेषुचाप्यहं॥२९॥ अपिचेत्सुदुराचारो
५५ भजतेमामनन्यभाक्॥ साधुरेवसमंत
व्यः सम्यग्व्यवसितोहिसः॥३०॥ क्षिप्रं
भवतिधर्मात्माशश्वच्छांतिंनिगच्छति॥

कौंतेयप्रतिजानीहिनमेभक्तः प्रणश्य
ति ॥ ३ ॥ मांहिपार्थव्यपाश्रित्ययेपिस्युः
पापयोनयः ॥ स्त्रियोवैश्यास्तथाशूद्रा
स्तेपियांतिपरांगतिं ॥ किंपुनर्ब्राह्मणाःपु
ण्याभक्ताराजर्षयस्तथा ॥ अनित्यमसुखं

197

गी. लोकमिमंप्राप्यभजस्वमाम्॥३३॥मन्म
ता. नाभवमद्भक्तोमद्याजीमांनमस्कुरु॥
न. मामेवैष्यसियुक्त्वैवमात्मानंमत्पराय
९.. णः॥३४॥इतिश्रीभगवद्गीतासूपनि
षत्सुब्रह्मविद्यायांयोगशास्त्रेश्रीकृ

गुह्य

स्मार्त्तेषु संवादे राजविद्याराजयोगो नाम

नवमोध्यायः ॥ श्री ॥ श्रीभगवानुवाच ॥ भू

य एव महाबाहो शृणु मे परमं वचः । य

त्तेहं प्रीयमाणाय वक्ष्यामि हितकाम्यया स्य

॥१॥ न मे विदुः सुरगणाः प्रभवं न महर्षयः :

199

गी.
द.
११

अहमादिर्हि देवानां महर्षीणां च सर्वशः
यो मामजमनादिं च वेत्ति लोकमहेश्वरं
असंमूढः स मर्त्येषु सर्वपापैः प्रमुच्यते
॥३॥ बुद्धिर्ज्ञानमसंमोहः क्षमा सत्यं दमः
शमः॥ सुखं दुःखं भवोभावो भयं चाभयमे

वचः ॥ ४ ॥ अहिंसा समता तुष्टिस्तपो दानं य
शोऽयशः ॥ भवन्ति भावा भूतानां मत्त एव पृ
थग्विधाः ॥ ५ ॥ महर्षयः सप्त पूर्वे चत्वा
रो मनवस्तथा ॥ मद्भावा मानसा जाता ये
षां लोक इमाः प्रजाः ॥ ६ ॥ एतां विभूतिं यो

201

गी. गंचममयोवेत्तितत्वत ॥ सोविकंपेनयोग
द. नयुज्यतेनात्रसंशयः ॥ अहंसर्वस्यप्र
११२ भवोमत्तःसर्वंप्रवर्तते इतिमत्वाभजंते
मांबुधाभावसमन्विता ॥ मच्चित्तामद्गत
प्राणाबोधयंतःपरस्परं ॥ कथयंतश्च

मोनित्यंतुष्यंतिचरमंतिच॥९॥तेषांस
ततयुक्तानांभजतांप्रीतिपूर्वकम् दा
मिबुद्धियोगंतंयेनमामुपयांतिते॥१०॥
तेषामेवानुकंपार्थमहमज्ञानजंतमः॥
नाशयाम्यात्मभावस्थोज्ञानदीपेनभा

203

गी. स्वता॥११॥ अर्जुनउवाच॥परंब्रह्मपरंधाम
द. पवित्रंपरमंभवान्॥ पुरुषंशाश्वतंदि
१३ व्यमादिदेवमजंविभुम्॥१२॥ आहुस्त्वा
मृषयःसर्वेदेवर्षिर्नारदस्तथा॥
असितोदेवलोव्यासःस्वयंचैवब्रवीषिमे

204

सर्वमेतदृतं मन्ये यन्मां वदसि केशव न
हि ते भगवन्व्यक्तिं विदुर्देवा न दानवाः॥ १४ 6
स्वयमेवात्मनात्मानं वेत्थ त्वं पुरुषोत्तम
भूतभावन भूतेश देवदेव जगत्पते ॥१५॥ व
क्तुमर्हस्यशेषेण दिव्या ह्यात्मविभूतयः

205

गी० याभिर्विभूतिभिर्लोकानिमांस्त्वं व्याप्य
द० तिष्ठसि ॥१६॥ कथं विद्यामहं योगिंस्त्वां
२० सदा परिचिंतयन् ॥ केषु केषु च भावेषु
चिंत्योसि भगवन्मया ॥१७॥ विस्तरेणात्म
नो योगं विभूतिं च जनार्दन ॥ भूयः कथ

यतृप्तिर्हि शृण्वतो नास्ति मे मृतम् ॥ श्री
भगवानुवाच ॥ हंत ते कथयिष्यामि दि
व्या ह्यात्मविभूतयः ॥ प्राधान्यतः कुरुश्रे
ष्ठ नास्त्यंतो विस्तरस्य मे ॥ १९ ॥ अहमा
त्मा गुडाकेश सर्वभूताशयस्थितः ॥ अह

२०७

गी. मादिश्च मध्यं च भूतानामन्त एव च ॥ आदि
द त्यानामहं विष्णुर्ज्योतिषां रविरंशुमान्
मरीचिर्मरुतामस्मि नक्षत्राणामहं श
शी ॥ २१ ॥ वेदानां सामवेदोस्मि देवानामस्मि
वासवः ॥ इंद्रियाणां मनश्चास्मि भूताना

20B

मस्मिचेतना॥२२॥रुद्राणांशंकरश्चा
स्मिवित्तेशोयक्षरक्षसाम्॥वसूनांपा
